अथपिंडपितृयज्ञप्रारंभः ॥

स [illegible] सूत्रम्

श्रीगणेशाय नमः ॥ ॥ अथ पिंडपितृयज्ञप्रारंभः ॥ ॥ ॥
अथ प्रसंगादनाहिताग्नेः पिंडपितृयज्ञः ॥ सूत्रं ॥ अमावास्याया
मपराह्णे पिंडपितृयज्ञेन यजतेत्यादि ॥ पिंडपितृयज्ञो नित्यः का
म्यश्चेति व्याख्यातारः श्रौते तु सप्तहविर्यज्ञत्वेन नित्यः । स्मार्ते तु
अमावास्यायामपराह्णे मासिकम् । अनेन सप्तपाकसंस्थासु च
मासिश्राद्धं नित्यं । पिंडपितृयज्ञस्तु काम्यः कर्मांतरं । अत एवा
चार्यैः ॥ सायमेवं विहितं अनाहिताग्नेस्तत्र यानि श्रपणसंयु
क्तानि तान्यौपासने क्रियंते । अतिप्रणीत आहुती जुहोति यास्मिं
जुहोति तमुपतिष्ठतेत्र गार्हपत्यः प्रवादः परिलुप्यते तिसूत्रा

* मुहूर्ताधिकामावास्या सत्वेपरे द्युरेवापराह्णे कार्यः ॥८+

काम्यत्वेन प्राप्तिः ॥ एकस्मिन्नेव काले मासिश्राद्धस्य पिंडपितृयज्ञस्य च का
लैक्यात् । होममन्त्रैकत्वाच्च व्यतिषंगानुष्ठानं आश्वलायनादीनां युक्तं
। न तु तैत्तिरीयाणां । प्रधानहोममंत्राभेदात् ॥ अत एव मनुः ॥ पक्षांतं कर्म ॥ अन्वाधानं
निर्वर्त्य वैश्वदेवं तु साग्निकः । पिंडयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुधः ॥ दर्शश्राद्ध
मि ॥ ॥ यदा मासिके श्राद्धे अधिकारी तदा द्वेधा विभागपक्षमा
श्रित्य पिंडपितृयज्ञस्य अपराह्णे ग्राह्यः ॥ अन्यथा पिंडपितृ
यज्ञानंतरं क्रियमाणमासिश्राद्धस्य काललोपः स्यात् ॥ तस्य च
त्रेधा विभागपक्षमाश्रित्य प्रयोगः ॥ ॥ इति परिभाषा ॥ ॥ ॥
॥ अथ प्रयोगः ॥ यजमानः अग्नेः पश्चादुपविश्य । देशकालौ सं

पिं०प० ॥२॥

कीर्त्य॥ पितृप्रीत्यर्थं पिंडपितृयज्ञेन यक्ष्ये॥ प्राचीनावीती। अपां मे
ध्यं यज्ञियं सदेवं शिवमस्तु मे॥ आछेत्तावो मा रिषं जीवानि शरदः
शतं॥ इति सकृदाछिन्नं समूलं बर्हिराछिनत्ति॥ तूष्णीं परिस्त
रणार्थान्॥ अपउपस्पृश्य॥ दक्षिणाप्रागग्रैर्दर्भैरग्निं परिस्तीर्य॥
उत्तरेणाग्निं दर्भान्संस्तीर्य॥ एकैकशः पिंडपितृयज्ञपात्राणि प्रयु
नक्ति॥ स्फ्यं स्थालीं मेक्षणं शूर्पं कृष्णाजिनं उलूखलं मुसलं॥ अप
रेणाग्निं व्रीहीमच्छकटमवस्थाप्य॥ एकपवित्रां तर्हितां स्थालीं
व्रीहीभिः पूरयित्वा॥ निमृज्य। पितृभ्यस्त्वा जुष्टं निर्वपामीति स
कृदेव शूर्पे निर्वपति॥ शकटाभावे स्फ्ये पात्र्यां वा॥ अग्नेर्दक्षिण ॥२॥
तो वायव्यग्रीवं कृष्णाजिनमास्तीर्य॥ तस्मिन्नुलूखलं निधाय॥

आग्नेयाभिमुखीपत्न्यवहति परापावमनविवेकं सकलफलीकरोति ॥ सव्वस
क्षाल्य ॥ अग्नौजीवतं दुलमिवचरुं श्रपयित्वा ॥ एकपवित्रेणोत्पूते न न
वनीतेन ॥ अनूत्पूतेनाज्येनवा । अभिघार्योद्वास्य ॥ उपवीतिदक्षिणंजा
~~न्वाच्य मेक्षणेन स्थालीपाकस्योपहत्यजुहोति ॥ सोमाकपित्तपीत~~
~~यस्वधानमः ॥ सोमाकपित्तपीतायेदं~~ ॥ अग्नेःपश्चान्निदधाति ॥ ततः
येरूपाणिप्रतिमुंचमाना असुराःसंतःस्वधयाचरंति ॥ परापुरोनिपु
रायेभरंत्यग्निष्ठानस्मात्प्रणुनोतुलोकात् ॥ ॥ इत्यग्निःसकाशाद्दे
कोल्मुकं दक्षिणेनहृत्वा ॥ एकस्फ्यलिखितां ते देशेनिदधाति ॥ उपवी
ती । दक्षिणंजान्वाच्य ॥ मेक्षणेन स्थालीपाकस्योपहत्यजुहोति ॥ सो

पिं०य० मायपितृपीतायस्वधानमः॥ सोमायपितृपीतायेदं०॥ यमायांगिरस्वते
॥३॥ पितृमतेस्वधानमः॥ यमायांगिरस्वते पितृमतइदं०॥ येमेक्षणे तंदुला
स्तांजुहोति॥ अग्नयेकव्यवाहनायस्विष्टकृतेस्वधानमः॥ अग्नये
कव्यवाहनायस्विष्टकृतइदं०॥ तूष्णींमेक्षणमादधाति॥ ॥ततोग्नेर्द
क्षिणतः॥ अपहतासुरारक्षांसिवेदिषदः॥ इत्यवहननदेशेदक्षिणां
दक्षिणांप्राचीवावेदिंसकृत्स्फ्येनोलिख्य॥ उदीरतामवरउत्परा
सउन्मध्यमाःपितरःसोम्यासः॥ असुंयईयुरवृकाऋतज्ञास्तेनो
वंतुपितरोहवेषु॥ इतितांरेखांअद्भिरवोक्षति॥ सकृदाच्छिंनंबर्हि
रूर्णम्रदुस्योनंपितृभ्यस्त्वाभराम्यहं॥ अस्मिन्सीदंतुमेपितरःसो ३॥

स्याः पितामहाः प्रपितामहाः स्यानुगैः सह॥ सकृदाछिन्ने बर्हिषि एक
स्फ्यां वेदिं स्तृणाति॥ तस्यां बर्हिषो मूलप्रदेशे होतावशेषस्था
लीं निदधाति॥ वेद्याद्दक्षिणतः आंजनाभ्यंजनं कशिपूपबर्हणमुद
कुंभं च प्रतिष्ठापयाति॥ यजमानः प्राचीनावीती सव्यं जान्वाचोपवि
श्य॥ सकृदाछिंनेवाचीनपाणि दक्षिणापवर्गं स्त्रीनुदकांजलिं
निनयाति॥ मार्जयंतां पितरः सोम्याः सो मार्जयंतां पितामहाः
सोम्याः सो मार्जयंतां प्रपितामहाः सोम्याः सः॥ ॥ इति ततस्ते
षु अवाचीनपाणिर्दक्षिणापवर्गान्॥ ॥ एतत्ते तत अमुकशर्म
न्। ये च त्वामनु॥ इति पित्रे॥ एतत्ते पितामह अमुकशर्मन्

पिं०य०
८ ॥

ये च त्वामनु॥ ॥पितामहाय॥ ॥एतत्तेप्रपितामहनुँह असुकशर्म
न्ये चत्वामनु॥ ॥प्रपितामहायपिंडंददाति॥ नामगोत्रवसु
रूपादिशब्दोच्चारणं अविधानात्। तूष्णीं चतुर्थं सकृताकृतः॥
एवं निधायपिंडान्॥ ॥आपोदेवीः स्वधयावंदमानास्तावोग
छंतुपितरः स्योनाः॥ ऊर्जं वहंतीः सतमक्षितोदकाः क्षीरमुद
कं घृतं मधुपयः कीलालं परिस्रुतं स्वधास्थतर्पयत मे पि
तॄन्॥ ॥इतिमंत्रेण पूर्व प्रतिष्ठितोदकुंभादेकदेशमुदकं पात्रां
तरेगृहीत्वा प्रतिपिंडेषु मंत्रावृत्त्या उदकांजलिं निनयति॥ ॥

अत्रपितरोयथाभागंमंदध्वँमनुस्वधामावृषायध्वं॥ ॥इतिपूर्वमंत्र
मुक्का॥पश्चात्सदक्षिणंपराङ्मुखमावृत्यातिष्ठेत्॥ ॥स्वाहोष्मणो
व्यथिष्यइतिउष्माणमुद्यंतं अनुमंत्रयते॥स्वासनिर्गमनंकृ
त्वेत्यर्थः॥ ॥अमीमदंतपितरोनुस्वधमावृषाईत्रात॥इत्युक्का॥
अप्रदक्षिणमुपपर्यावर्तते॥स्थाल्यांएं शेषस्तंअवघ्रेणभक्ष
यति॥ ॥नप्रत्यक्षभक्षणं॥ ॥उदकस्पर्शः॥अथवाउपस्पर्श
तिवाबहिर्निष्कास्यहस्तेनस्पर्शाति॥नोदकस्पर्शः॥अथवा
आमयावीअन्नाद्यकामोवाआग्नीयात्॥आमयावीरोगवान्॥अन्ना

पिं० प०
८

घकामी चप्राशयेदित्यर्थः॥ ॥ततः ओं क्ष्यासामुकशर्मन्॥ त्रिरां जनंप्र
त्येकं प्रत्येकं त्रिः॥ सकृन्मंत्रेण द्विस्तूष्णीं॥ एवं प्रत्येकं अभ्यंक्ष्वामुकश
र्मन्॥ इति त्रिरभ्यंजनं प्रत्येकं प्रत्येकं त्रिः॥ ॥ एतानि वह पितरो वासाः॥
स्यतो नोन्यत् पितरो मायूढ्व॥ ॥इति सूत्रं वयसि त्वचव वस्त्र दशां आवि
लोम युजं वाछित्वा पिंडेषु निदधाति॥ पंचाशद्वर्षतायाउर्ध्वं षष्ठि
वर्षोर्ध्वं वा स्वं लोमाछित्वान्यस्यति॥ इत्याहाश्वलायन बोधायनौ॥
उत्तर आयुषि लोमाछिंदितेति श्रुतेः॥ ॥ उर्ध्वं वै पुरुषस्य नाभिः॥
इति श्रुतेश्च॥ ॥ नमो वः पितरो रसायेति नमस्कारैरुपतिष्ठते॥

ऊर्जस्वती स्वधया वंदमाना स्ता वो गच्छंतु पितरः स्योनाः॥ ऊर्जं वहं
ती सतमक्षितोदकाक्षीरं मुदकं घृतं मधु पयः कीलालं परिस्रुतं
स्वधास्थ तर्पयत मे पितॄन्॥ ॥इति उदकुंभावशेषं पूर्ववत् त्रिरु
दकांजलिं निनयति॥ उत्तिष्ठत पितरः प्रेत पूर्वे यमस्य पंथामनु
जाता पुराणं॥ धत्तादस्मासु द्रविणं यच्च भद्रं प्रणो ब्रूता द्भागधां
देवतासु॥ ॥इति पितॄनुत्थापयति॥ ॥पितॄणामुत्थापनं भाव्यं
जपतीत्यर्थः॥ पिंडानुत्थापयति वा॥ ॥परेत पितरः सोम्या गं
भीरैः पथिभिः पूर्व्यैः॥ अथा पितॄन्त्सुविदत्रां अपीत यमेन

पिं०य०
६९

येसधमादंमदंति॥ ॥इतिपिंडानप्रवाहयंति॥प्रवाहणंसमीचीनैर्यानैःपितृलो
कंप्रतिनयनंइत्यर्थः॥ ॥यंतुपितरोमनसाजवेन॥इतिपितृन्सं॑सादयति॥
पितृलोकंप्रापयतीत्यर्थः॥ ॥मनोन्वाहुवामहेनाराशं॑सेनस्तोमेनपितृणां
चमन्मभिः॥आनएतुमनःपुनःक्रत्वेदक्षायजीवसे॥ज्योक्चसूर्यंदृशे॥
पुनर्नःपितरोमनोददातुदैव्योजनः॥जीवंव्रातं॑सचेमहि॥ ॥इतिमनस्व
तीभिरुपतिष्ठते॥स्वलोकस्थानपितॄननुपतिष्ठतेइत्यर्थः॥ ॥अक्षन्नमीमदं
तह्यवप्रिया अधूषत॥अस्तोषतस्वभानवोविप्रानविष्ठयामती॥योजा
न्विंद्रतेहरी॥प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिताबभूव॥यत्का
मास्तेजुहुमस्तंनोअस्तुवयं॑स्यामपतयोरयीणां॥इतिद्वाभ्यांउपवीती
भूत्वाउपस्थानार्थंगार्हपत्यंप्रतिगच्छति॥अग्नेरुपासनंप्रतीत्यर्थः॥ ॥

यदंतरिक्षं पृथिवीमुतद्यां यन्मातरं पितरं वाजिहिंसिम ॥ अग्निर्मातस्मादे
न सः प्रमुंचतुदुरितायानि चकृम करोतुमामनेनसं ॥ इति औपासनमुपति
ष्ठते ॥ अग्ने नोदू तं तोहविषो जातवेदो वाढव्यानि सुरभीणि कृत्वा ॥ प्रा
दाः पितृभ्यः स्वधयाते अक्षन्प्रजानन्नग्ने पुनरप्येतु देवान् ॥
इति पूर्वस्थापितमुल्मुकं पुनरग्नौ मेलयित्वा ॥ पिंडपितृयज्ञपा
त्राण्यद्भिरभ्युक्ष्य ॥ पश्चाद्द्वे प्रत्यवहरति ॥ चरुस्थाल्यां पिंडा
निक्षिपति ॥ अपांत्वौषधीनां रसं प्राशयामि भूतकृतं गर्भं ध
त्स्व ॥ इति मध्यमं पिंडं पत्न्यै प्रयच्छति ॥ आधत्तपितरो गर्भं कुमा
रं पुष्करस्रजं ॥ यथेह पुरुषः सत ॥ इति पत्नी तं पिंडं प्राश्नाति ॥

पिं०य०
6

बहुपत्निकश्चैतं पिंडं विभज्य प्रतिपत्नीनां दद्युः॥ सर्वाभिर्मंत्रेणाभ क्षणीयाः॥ पुरुषसंस्कारत्वात्॥ मंत्रलिंगाच्च तदर्थमेवार्थं वा दपठंति॥ ॥पुमांसं जनयतीति॥ ये समानाः समनसः पितरो यमराज्ये॥ तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पतां॥ ये सजाताः समनसो जीवा जीवेषु मामकाः॥ तेषां श्रीर्मयि कल्पता मस्मिन्लोके शतं समाः॥ इति द्वाभ्यां सकृदाच्छिन्नां तूष्णीम भ्युक्ष्य॥ अग्नावादधाति॥ अपः पिंडानप्सु वहरंति॥ ब्राह्मणं वा भोजयति॥ ॥ इति सत्याषाढहिरण्यकेशी सूत्रे संस्कारनिर्णये पिंडपितृयज्ञप्रयोगः समाप्तः॥ ॥छ॥ ॥ ॥

श्रीगणेशाय नमः

ये रूपा. अपहता. उदीर. सकृदाछि. मार्जयंतां. एतन्वःपिंडदानं। आपोदेवीः स. अत्रपितरोम.
धामामंमंदधन्नतु स्वधमाहृष. यध्वं। स्वाहोष्मणो: अमीमदंतपितरोनुस्वधनाद्वृषाईरात।
ओंस्व अभ्यंक्ष्व। एतानिवः पि. । कुशाभि. पिंडपूजनं। नमोवः पि. ऊर्जंवहन्तीः स. ॥ शिवाआपः
संत्विस्यादि दक्षिणा अक्षय्यं स्वधासं. उत्तमोदेव पि. प्रसाले. नमस्कारः देवापित्रविसर्जनं।
उत्तिष्ठन्त पि. परेतन पि. यंतु पि. मनोन्वाहु. अग्नन्न. प्रजापते. यदंतरि. अभूनोदू. येसमानाः
स. येसजा.

॥ छ ॥ इतिपिंडपितृयज्ञप्रयोगसमाप्तः ॥ छ ॥